## तासस्त्योर्लोपः । (५०/२१९१)

[1]तासेः अस्तेश्च सकारस्य सकारादौ प्रत्यये परतः लोपो भवति । तासेः – कर्तासि । कर्तासे । अस्तेः– त्वमसि । व्यतिसे । अस्तेः अकारसकारयोः लुप्तयोः से इति प्रत्यय[2]मात्रमेतत् पदम्, [3]तेन 'सात् पदाद्योः' (८.३.१११/२१२३) इति [4]षत्वं न भवति ॥

## रि च । (५१/२१९२)

रेफादौ च प्रत्यये परतः तासस्त्योः सकारस्य लोपो भवति । कर्तारौ । कर्तारः । अध्येतारौ । अध्येतारः ॥

## ह एति । (५२/२२५०)

तासस्त्योः सकारस्य हकारादेशो भवति एति परतः । कर्ताहे[5] । अस्तेः – व्यतिहे[6] ॥

## यीवर्णयोर्दीधीवेव्योः । (५३/२४८८)

यकारादौ इवर्णादौ च परतो दीधीवेव्योः लोपो भवति । यकारादौ – आदीध्य गतः । आवेव्य गतः आदीध्यते । आवेव्यते । इवर्णादौ – आदीधिता । आवेविता । [7]लिङि – आदीधीत । आवेवीत । यीवर्णयोः इति किम् ? [8]आदीध्यनम् । [9]आवेव्यनम् ॥

## सनि मीमाघुरभलभशकपतपदामच इस् । (५४/२६२३)

सनि प्रत्यये सकारादौ परतः मी मा घु रभ लभ शक पत पद इत्येतेषाम् अङ्गानाम् अचः स्थाने इस् इत्ययमादेशो भवति । मी इति मीनातिमिनोत्योः [10]द्वयोरपि[11]ग्रहणमिष्यते । [12]मित्सति । प्रमित्सति । मा इति गामादाग्रहणेषु अविशेषः । [13]मित्सते । अपमित्सते । घु – [14]दित्सति । धित्सति । रभ – आरिप्सते । लभ – आलिप्सते । शक – शिक्षति । पत् – पित्सति । पद – प्रपित्सते[15] । सनि इति किम् ? दास्यति[16] । सि इत्येव, पिपतिषति । 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' (कात्या. वा. ५०५९) इति पतेः इडागमविकल्पः ।

[८७६] सनि राधो हिंसायामच इस् वक्तव्यः ।

प्रतिरित्सति । हिंसायाम् इति किम् ? [17]आरिरात्सति ॥

---

1. सः सि इति वर्तते इत्यधिकम् ह. 2. मात्रमेवेदम् ब. 3. तेन नास्ति ब, वाक्यमिदं नास्ति क.ब.ह. 4. षत्वप्रतिषेधः इ. 5. हतहि इत्यधिकम् क. 6. आत्मनेपदोत्तमैकवचने रूपम् इत्यधिकम् ह. 7. लिङि-आवेव्यनम् नास्ति ब. 8. आदीध्यकः इ. 9. आवेव्यकः इ. 10. उभयोरपि ह. 11. इष्यते नास्ति इ. 12. निमित्सति ह. 13. प्रमित्सते ह. 14. दित्सति नास्ति ह. 15. अत्र लोपोऽभ्यासस्य इति अभ्यासलोपः इत्यधिकम् ह. 16. धास्यति इत्यधिकम् इ. 17. आरिस्यति इ, रात्सति ह.